# Dhvanyalokah Udyotah 2

# ધ્વન્યાલોકઃ ઉદ્યોતઃ ૨

## Document Information

Text title : Dhvanyaloka Udyota 2

File name : dhvanyaloka2.itx

Category : major_works

Location : doc_z_misc_major_works

Transliterated by : Rajani Arjun Shankar

Proofread by : Rajani Arjun Shankar

Latest update : January 4, 2002

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 7, 2024

*sanskritdocuments.org*

# Dhvanyalokah Udyotah 2

# ધ્વન્યાલોકઃ ઉદ્યોતઃ ૨

॥ દ્વિતીયઃ ઉદ્યોતઃ ॥

એવમવિવક્ષિતવાચ્યવિવક્ષિતાન્યપરવાચ્યત્વેન
ધ્વનિર્દ્વિપ્રકારઃ પ્રકાશિતઃ।
તત્રાવિવક્ષિતવાચ્યસ્ય પ્રભેદપ્રતિપાદનાયેદમુચ્યતે —

અર્થાન્તરે સઙ્ક્રમિતમત્યન્તં વા તિરસ્કૃતમ્ ।
અવિવક્ષિતવાચ્યસ્ય ધ્વનેર્વાચ્યં દ્વિધા મતમ્ ॥ ૧॥

તથાવિધાભ્યાં ચ તાભ્યાં વ્યઙ્ગ્યસ્યૈવ વિશેષઃ ।

તત્રાર્થાન્તરસઙ્ક્રમિતવાચ્યો યથા —
સ્નિગ્ધશ્યામલકાન્તિલિપ્તવિયતો વેલ્લદ્બલાકા ઘના
વાતાઃ શીકરિણઃ પયોદસુહૃદામાનન્દકેકાઃ કલાઃ ।
કામં સન્તુ દૃઢં કઠોરહૃદયો રામોઽસ્મિ સર્વં સહે
વૈદેહી તુ કથમ્ ભવિશ્યતિ હહા હા દેવિ ધીરા ભવ ॥

ઇત્યત્ર રામશબ્દઃ । અનેન હિ વ્યઙ્ગ્યધર્માન્તરપરિણતઃ સઞ્જ્ઞી
પ્રત્યાય્યતે , ન સંજ્ઞિમાત્રમ્ ।

યથા ચ મમૈવ વિષમબાણલીલાયામ્ —
તદા જાયન્તે ગુણા યદા તે સહૃદયૈર્ગૃહ્યન્તે ।
રવિકિરણાનુગૃહીતાનિ ભવન્તિ કમલાનિ કમલાનિ ॥

ઇત્યત્ર દ્વિતીયઃ કમલશબ્દઃ ।

અત્યન્તતિરસ્કૃતવાચ્યો યથાદિકવેર્વાલ્મીકેઃ —
રવિસઙ્ક્રાન્તસૌભાગ્યસ્તુષારાવૃતમણ્ડલઃ ।
નિઃશ્વાસાન્ધ ઇવાદર્શશ્ચન્દ્રમા ન પ્રકાશતે ॥ ઇતિ ।
અત્રાન્ધશબ્દઃ ।
ગગનં ચ મત્તમેઘં ધારાલુલિતાર્જુનાનિ ચ વનાનિ ।

નિરહઙ્કારમૃગાઙ્કા હરન્તિ નીલા અપિ નિશાઃ ॥

અત્ર મત્તનિરહઙ્કારશબ્દૌ ॥ ૧॥

અસંલક્ષ્યક્રમોદ્દ્યોતઃ ક્રમેણ દ્યોતિતઃ પરઃ ।
વિવક્ષિતાભિધેયસ્ય ધ્વનેરાત્મા દ્વિધા મતઃ ॥ ૨॥

મુખ્યતયા પ્રકાશમાનો વ્યઙ્ગ્યોઽર્થો ધ્વનેરાત્મા । સ ચ વાચ્યાર્થાપેક્ષયા
કશ્ચિદલક્ષ્યક્રમતયા પ્રકાશતે , કશ્ચિદ્ક્રમેણેતિ દ્વિધા મતઃ ॥ ૨॥

તત્ર
રસભાવતદાભાસતત્પ્રશાન્ત્યાદિરક્રમઃ ।
ધ્વનેરાત્માઙ્ગિભાવેન ભાસમાનો વ્યવસ્થિતઃ ॥ ૩॥

રસાદિરર્થો હિ સહેવ વાચ્યેનાવભાસતે । સ ચાઙ્ગિત્વેનાવભાસમાનો
ધ્વનેરાત્મા ।

ઇદાનીં રસવદલંકારાદલક્ષ્યક્રમદ્યોતનાત્મનો ધ્વનેર્વિભક્તો
વિષય ઇતિ પ્રદર્શ્યતે —
વાચ્યવાચકચારુત્વહેતૂનાં વિવિધાત્મનામ્ ।
રસાદિપરતા યત્ર સ ધ્વનેર્વિષયો મતઃ ॥ ૪॥

રસભાવતદાભાસતત્પ્રશમલક્ષણં મુખ્યમર્થમનુવર્તમાના
શબ્દાર્થાલઙ્કારા ગુણાશ્ચ પરસ્પરં ધ્વન્યપેક્ષયા
વિભિન્નરૂપા વ્યવસ્થિતાસ્તત્ર કાવ્યે ધ્વનિરિતિ વ્યપદેશઃ ॥ ૪॥

પ્રધાન્યેઽન્યત્ર વાક્યાર્થે યત્રાઙ્ગં તુ રસાદયઃ ।
કાવ્યે તસ્મિન્નલઙ્કારો રસાદિરિતિ મે મતિઃ ॥ ૫॥

યદ્યપિ રસવદલઙ્કારસ્યાન્યૈર્દર્શિતો વિષયસ્તથાપિ યસ્મિન્ કાવ્યે
પ્રધાનતયાઽન્યોઽર્થો વાક્યાર્થીભૂતસ્તસ્ય ચાઙ્ગભૂતા યે
રસાદયસ્તે રસાદેરલઙ્કારસ્ય વિષયા ઇતિ મામકીનઃ પક્ષઃ ।
તદ્યથા ચાટુષુ પ્રેયોઽલઙ્કારસ્ય વાક્યાર્થત્વેઽપિ
રસાદયોઽઙ્ગભૂતા દૃશ્યન્તે ।

સ ચ રસાદિરલઙ્કારઃ શુદ્ધઃ સઙ્કીર્ણો વા । તત્રાદ્યો યથા —

કિં હાસ્યેન ન મે પ્રયાસ્યસિ પુનઃ પ્રાપ્તશ્ચિરાદ્દર્શનં
કેયમ્ નિષ્કરુણ પ્રવાસરુચિતા કેનાસિ દૂરિકૃતઃ ।

સ્વપ્નાન્તેષ્વિતિ તે વદન્ પ્રિયતમવ્યાસક્તકણ્ઠગ્રહો
બુદ્ધ્વા રોદિતિ રિક્તબાહુવલયસ્તારં રિપુસ્ત્રીજનઃ ॥

ઇત્યત્ર કરુણરસસ્ય શુદ્ધસ્યાઙ્ગભાવાત્સ્પષ્ટમેવ
રસવદલઙ્કારત્વમ્ । એવમેવંવિધે વિષયે રસાન્તરાણાં સ્પષ્ટ
એવાઙ્ગભાવઃ ।

સઙ્કીર્ણો રસાદિરઙ્ગભૂતો યથ —
ક્ષિપ્તો હસ્તાવલગ્નઃ પ્રસભમભિહતોઽપ્યાદદાનોંઽશુકાન્તં
ગૃહ્ણન્ કેશેષ્વપાસ્તશ્ચરણનિપતિતો નેક્ષિતઃ સમ્ભ્રમેણ ।
આલિઙ્ગન્ યોઽવધૂતસ્ત્રિપુરયુવતિભિઃ સાશ્રુનેત્રોત્પલાભિઃ
કામીવાર્દ્રાપરાધઃ સ દહતુ દુરિતં શામ્ભવો વઃ શરાગ્નિઃ ॥

ઇત્યત્ર ત્રિપુરરિપુપ્રભાવાતિશયસ્ય વાક્યાર્થત્વે ઈર્ષ્યાવિપ્રલમ્ભસ્ય
શ્લેષસહિતસ્યાઙ્ગભાવ ઇતિ , એવંવિધ એવ રસવદાદ્યલઙ્કારસ્ય
ન્યાય્યો વિષયઃ । અત એવ ચેર્ષ્યાવિપ્રલમ્ભકરુણયોરઙ્ગત્વેન
વ્યવસ્થાનાત્સમાવેશો ન દોષઃ । યત્ર હિ રસસ્ય વાક્યાર્થીભાવસ્તત્ર
કથમલઙ્કારત્વમ્ ? અલઙ્કારો હિ ચારુત્વહેતુઃ પ્રસિદ્ધઃ ; ન
ત્વસાવાત્મૈવાત્મનશ્ચારુત્વહેતુઃ ।
તથા ચાયમત્ર સઙ્ક્ષેપઃ —

રસભાવાદિતાત્પર્યમાશ્રિત્ય વિનિવેશનમ્ ।
અલઙ્કૃતીનાં સર્વાસામલઙ્કારત્વસાધનમ્ ॥

તસ્માદ્યત્ર રસાદયો વાક્યાર્થીભૂતાઃ સ સર્વો ન
રસાદેરલઙ્કારસ્ય વિષયઃ ; સ ધ્વનેઃ પ્રભેદઃ ,
તસ્યોપમાદયોઽલઙ્કારાઃ । યત્ર તુ પ્રાધાન્યેનાર્થાન્તરસ્ય
વાક્યાર્થીભાવે રસાદિભિશ્ચારુત્વનિષ્પત્તિઃ ક્રિયતે ,
સ રસાદેરલઙ્કારતાયા વિષયઃ ।

એવં ધ્વનેરુપમાદીનાં રસવદલઙ્કારસ્ય ચ વિભક્તવિષયતા
ભવતિ ।

યદિ તુ ચેતનાનાં વાક્યાર્થીભાવો રસાદ્યલઙ્કારસ્ય વિષય
ઇત્યુચ્યતે તર્હ્યુપમાદીનાં પ્રવિરલવિષયતા નિર્વિષયતા વાભિહિતા
સ્યાત્ । યસ્માદચેતનવસ્તુવૃત્તે વાક્યાર્થીભૂતે પુનશ્ચેતન-
વસ્તુવૃત્તાન્તયોજનયા યથાકથઞ્ચિદ્ભવિતવ્યમ્ । અથ સત્યામપિ

તસ્યાં યત્રાચેતનાનાં વાક્યાર્થીભાવો નાસૌ રસવદલઙ્કારસ્ય
વિષય ઇત્યુચ્યતે । તત્ મહતઃ કાવ્યપ્રબન્ધસ્ય રસનિધાનભૂતસ્ય
નીરસત્વમભિહિતં સ્યાત્ । યથા —

તરઙ્ગભ્રૂભઙ્ગા ક્ષુભિતવિહગશ્રેણિરશના
વિકર્ષન્તી ફેનં વસનમિવ સંરમ્ભશિથિલમ્ ।
યથાવિદ્ધં યાતિ સ્ખલિતમભિસન્ધાય બહુશો
નદીરૂપેણેયં ધ્રુવમસહના સા પરિણતા ॥

યથા વા —
તન્વી મેઘજલાર્દ્રપલ્લવતયા ધૌતાધરેવાશ્રુભિઃ
શૂન્યેવાભરણૈઃ સ્વકાલવિરહાદ્વિશ્રાન્તપુષ્પોદ્ગમા ।
ચિન્તા મૌનમિવાશ્રિતા મધુકૃતાં શબ્દૈર્વિના લક્ષ્યતે
ચણ્ડી મામવધૂય પાદપતિતં જાતાનુતાપેવ સા ॥

યથા વા —
તેષાં ગોપવધૂવિલાસસુહૃદાં રાધારહઃસાક્ષિણાં
ક્ષેમં ભદ્ર કલિન્દશૈલતનયાતીરે લતાવેશ્મનાં ।
વિચ્છિન્ને સ્મરતલ્પકલ્પનમૃદુચ્છેદોપયોગેઽધુના
તે જાને જરઠીભવન્તિ વિગલન્નીલત્વિષઃ પલ્લવાઃ ॥

ઇત્યેવમાદૌ વિષયેઽચેતનાનાં વાક્યાર્થીભાવેઽપિ
ચેતનવસ્તુવૃત્તાન્તયોજનાસ્ત્યેવ ।
અથ યત્ર ચેતનવસ્તુવૃત્તાન્તયોજનાસ્તિ
તત્ર રસાદિરલઙ્કારઃ । તદેવં સત્યુપમાદયો નિર્વિષયાઃ
પ્રવિરલવિષયા વા સ્યુઃ । યસ્માન્નાસ્ત્યેવાસાવચેતનવસ્તુવૃત્તાન્તો
યત્ર ચેતનવસ્તુવૃત્તાન્તયોજના નાસ્ત્યન્તતો વિભાવત્વેન ।
તસ્માદઙ્ગત્વેન ચ રસાદીનામલઙ્કારતા । યઃ પુનરઙ્ગી રસો ભાવો
વા સર્વાકારમલઙ્કાર્યઃ સ ધ્વનેરાત્મેતિ ॥ ૫॥

કિઞ્ચ —
તમર્થમવલમ્બન્તે યેઽઙ્ગિનં તે ગુણાઃ સ્મૃતાઃ ।
અઙ્ગાશ્રિતાસ્ત્વલ'ઙ્કારા મન્તવ્યાઃ કટકાદિવત્ ॥ ૬॥

યે તમર્થં રસાદિલક્ષણમઙ્ગિનં સન્તમવલમ્બતે તે ગુણાઃ
શૌર્યાદિવત્ । વાચ્યવાચકલક્ષણાન્યઙ્ગાનિ યે પુનસ્તદાશ્રિતાસ્-

તેઽલઙ્કારા મન્તવ્યાઃ કટકાદિવત્ ॥ ૬॥

તથા ચ —
શૃઙ્ગાર એવ મધુરઃ પરઃ પ્રહ્લાદનો રસઃ ।
તન્મયં કાવ્યમાશ્રિત્ય માધુર્યં પ્રતિતિષ્ઠતિ ॥ ૭॥

શૃઙ્ગાર એવ રસાન્તરાપેક્ષયા મધુરઃ પ્રહ્લાદહેતુત્વાત્ ।
તત્પ્રકાશનપરશબ્દાર્થતયા કાવ્યસ્ય સ માધુર્યલક્ષણો ગુણઃ ।
શ્રવ્યત્વં પુનરોજસોઽપિ સાધારણમિતિ ॥ ૭॥

શૃઙ્ગારે વિપ્રલમ્ભાખ્યે કરુણે ચ પ્રકર્ષવત્ ।
માધુર્યમાર્દ્રતાં યાતિ યતસ્તત્રાધિકં મનઃ ॥ ૮॥

વિપ્રલમ્ભશૃઙ્ગારકરુણયોસ્તુ માધુર્યમેવ પ્રકર્ષવત્ ।
સહૃદયહૃદયાવર્જનાતિશયનિમિત્તત્વાદિતિ ॥ ૮॥

રૌદ્રાદયો રસા દીપ્ત્યા લક્ષ્યન્તે કાવ્યવર્તિનઃ ।
તદ્વ્યક્તિહેતૂ શબ્દાર્થાવાશ્રિત્યૌજો વ્યવસ્થિતમ્ ॥ ૯॥

રૌદ્રાદયો હિ રસાઃ પરાં દીપ્તિમુજ્જ્વલતાં જનયન્તીતિ લક્ષણયા
ત એવ દીપ્તિરિત્યુચ્યતે । તત્પ્રકાશનપરઃ શબ્દો દીર્ઘસમાસ-
રચનાલઙ્કૃતં વાક્યમ્ । યથા —

ચઞ્ચદ્ભુજભ્રમિતચણ્ડગદાભિઘાત-
સઞ્ચૂર્ણિતોરુયુગલસ્ય સુયોધનસ્ય ।
સ્ત્યાનાવબદ્ધઘનશોણિતશોણપાણિ-
રુત્તંસયિષ્યતિ કચાંસ્તવ દેવિ ભીમઃ ॥

તત્પ્રકાશનપરશ્ચાર્થોઽનપેક્ષિતદીર્ઘસમાસરચનઃ
પ્રસન્નવાચકાભિધેયઃ । યથા —
યો યઃ શસ્ત્રં બિભર્તિ સ્વભુજગુરુમદઃ પાણ્ડવીનાં ચમૂનાં
યો યઃ પાઞ્ચાલગોત્રે શિશુરધિકવયા ગર્ભશય્યાં ગતો વા ।
યો યસ્તત્કર્મસાક્ષી ચરતિ મયિ રણે યશ્ચ યશ્ચ પ્રતીપઃ
ક્રોધાન્ધસ્તસ્ય તસ્ય સ્વયમપિ જગતામન્તકસ્યાન્તકોઽહમ્ ॥

ઇત્યાદૌ દ્વયોરોજસ્તવ્મ્ ॥ ૯॥

સમર્પકત્વં કાવ્યસ્ય યત્તુ સર્વરસાન્ પ્રતિ ।
સ પ્રસાદો ગુણો જ્ઞેયઃ સર્વસાધારણક્રિયઃ ॥ ૧૦॥

પ્રસાદસ્તુ સ્વચ્છતા શબ્દાર્થયોઃ । સ ચ સર્વરસસાધારણો
ગુણઃ સર્વરચનાસાધારણશ્ચ વ્યઙ્ગ્યાર્થાપેક્ષયૈવ
મુખ્યતયા વ્યવસ્થિતો મન્તવ્યઃ ।
શ્રુતિદુષ્ટાદયો દોષા અનિત્યા યે ચ દર્શિતાઃ ।
ધ્વન્યાત્મન્યેવ શ‍ૃઙ્ગારે તે હેયા ઇત્યુદાહૃતાઃ ॥ ૧૧॥

અનિત્યા દોષાશ્ચ યે શ્રુતિદુષ્ટાદયઃ સૂચિતાસ્તેઽપિ ન
વાચ્યે અર્થમાત્રે , ન ચ વ્યઙ્ગ્યે શ‍ૃઙ્ગારે વા ધ્વનેરનાત્મભૂતે ।
કિં તર્હિ ? ધ્વન્યાત્મન્યેવ શ‍ૃઙ્ગારેઽઙ્ગિતયા વ્યઙ્ગ્યે
તે હેયા ઇત્યુદાહૃતાઃ । અન્યથા હિ તેષામનિત્યદોષતૈવ ન
સ્યાત્ । એવમયમસંલક્ષ્યક્રમદ્યોતો ધ્વનેરાત્મા પ્રદર્શિતઃ
સામાન્યેન ॥ ૧૧॥

તસ્યાઙ્ગાનાં પ્રભેદા યે પ્રભેદાઃ સ્વગતાશ્ચ યે ।
તેષામાનન્ત્યમન્યોન્યસમ્બન્ધપરિકલ્પને ॥ ૧૨॥

અઙ્ગિતયા વ્યઙ્ગ્યો રસાદિર્વિવક્ષિતાન્યપરવાચ્યસ્ય
ધ્વનેરેક આત્મા ય ઉક્તસ્તસ્યાઙ્ગાનાં
વાચ્ય વાચકાનુપાતિનામલઙ્કારાણાં યે પ્રભેદા
નિરવધયો યે ચ સ્વગતાસ્તસ્યાઙ્ગિનોઽર્થસ્ય
રસભાવતદાભાસતત્પ્રશમલક્ષણા
વિભાવાનુભાવવ્યભિચારિપ્રતિપાદનસહિતા અનન્તાઃ
સ્વાશ્રયાપેક્ષયા નિઃસીમાનો વિશેષાસ્તેષા-
મન્યોન્યસમ્બન્ધપરિકલ્પને ક્રિયમાણે કસ્યચિ-
દન્યતમસ્યાપિ રસસ્ય પ્રકારાઃ પરિસઙ્ખ્યાતું ન શક્યન્તે
કિમુત સર્વેષામ્ । તથા હિ શ‍ૃઙ્ગારસ્યાઙ્ગિનસ્તાવ-
દાદ્યૌ દ્વૌ ભેદૌ - સમ્ભોગો વિપ્રલમ્ભશ્ચ ।
સમ્ભોગસ્ય ચ પરસ્પરપ્રેમદર્શનસુરતવિહરણાદિ-
લક્ષણાઃ પ્રકારાઃ । વિપ્રલમ્ભસ્યાપ્યભિલાષેર્ષ્યા-
વિરહપ્રવાસવિપ્રલમ્ભાદયઃ । તેષાં ચ પ્રત્યેકં
વિભાવાનુભાવવ્યભિચારિભેદઃ । તેષાં ચ
દેશકાલાદ્યાશ્રયાવસ્થાભેદ ઇતિ સ્વગતભેદાપેક્ષ-
યૈકસ્ય તસ્યાપરિમેયત્વં , કિં પુનરઙ્ગપ્રભેદ-

કલ્પનાયામ્ । તે હ્યઙ્ગપ્રભેદાઃ પ્રત્યેકમઙ્ગિ-
પ્રભેદસમ્બન્ધપરિકલ્પને ક્રિયમાણે સત્યાનન્ત્ય-
મેવોપયાન્તિ ॥ ૧૨॥

દિઙ્માત્રં તૂચ્યતે યેન વ્યુત્પન્નાનાં સચેતસામ્ ।
બુદ્ધિરાસાદિતાલોકા સર્વત્રૈવ ભવિષ્યતિ ॥ ૧૩॥

દિઙ્માત્રકથનેન હિ વ્યુત્પન્નાનાં સહૃદયાનામેકત્રાપિ
રસભેદે સહાલઙ્કારૈરઙ્ગાઙ્ગિભાવપરિજ્ઞાનાદાસાદિતાલોકા
બુદ્ધિઃ સર્વત્રૈવ ભવિષ્યતિ । તત્ર —
શૃઙ્ગારસ્યાઙ્ગિનો યત્નાદેકરૂપાનુબન્ધવાન્ ।
સર્વેષ્વેવ પ્રભેદેષુ નાનુપ્રાસઃ પ્રકાશકઃ ॥ ૧૪॥

અઙ્ગિનો હિ શૃઙ્ગારસ્ય યે ઉક્તાઃ પ્રભેદાસ્તેષુ
સર્વેષ્વેકપ્રકારાનુબન્ધિતયા પ્રબન્ધેન
પ્રવૃત્તોઽનુપ્રાસો ન વ્યઞ્જકઃ । અઙ્ગિન ઇત્યનેનાઙ્ગભૂતસ્ય
શૃઙ્ગારસ્યૈકરૂપાનુબન્ધ્યનુપ્રાસનિબન્ધને
કામચારમાહ ॥ ૧૪॥

ધ્વન્યાત્મભૂતે શૃઙ્ગારે યમકાદિનિબન્ધનમ્ ।
શક્તાવપિ પ્રમાદિત્વં વિપ્રલમ્ભે વિશેષતઃ ॥ ૧૫॥

ધ્વનેરાત્મભૂતઃ શૃઙ્ગારસ્તાત્પર્યેણ વાચ્યવાચકાભ્યાં
પ્રકાશ્યમાનસ્તસ્મિન્યમકાદીનાં યમકપ્રકારાણાં
નિબન્ધનં દુષ્કરશબ્દભઙ્ગશ્લેષાદીનાં શક્તાવપિ
પ્રમાદિત્વં ।“પ્રમાદિત્વ”મિત્યનેનૈતદ્દર્શ્યતે — કાકતાલીયેન
કદાચિત્કસ્યચિદેકસ્ય યમકાદેર્નિષ્પત્તાવપિ ભૂમ્નાલઙ્કારાન્તર-
વદ્રસાઙ્ગત્વેન નિબન્ધો ન કર્તવ્ય ઇતિ ।“વિપ્રલમ્ભે વિશેષત”ઇત્યનેન
વિપ્રલમ્ભે સૌકુમાર્યાતિશયઃ ખ્યાપ્યતે । તસ્મિન્દ્યોત્યે યમકાદેરઙ્ગસ્ય
નિબન્ધો નિયમાન્ન કર્તવ્ય ઇતિ ॥ ૧૫॥

અત્ર યુક્તિરભિધીયતે —
રસાક્ષિપ્તતયા યસ્ય બન્ધઃ શક્યક્રિયો ભવેત્ ।
અપૃથગ્યત્નનિર્વર્ત્યઃ સોઽલઙ્કારો ધ્વનૌ મતઃ ॥ ૧૬॥

નિષ્પત્તાવાશ્ચર્યભૂતોઽપિ યસ્યાલઙ્કારસ્ય રસાક્ષિપ્તતયૈવ
બન્ધઃ શક્યક્રિયો ભવેત્સોઽસ્મિન્નલક્ષ્યક્રમવ્યઙ્ગ્યે

ધ્વનાવલઙ્કારો મતઃ । તસ્યૈવ રસાઙ્ગત્વં મુખ્યમિત્યર્થઃ।
યથા —
કપોલે પત્રાલી કરતલનિરોધેન મૃદિતા
નિપીતો નિઃશ્વાસૈરયમમૃતહૃદ્યોઽધરરસઃ ।
મુહુઃ કણ્ઠે લગ્નસ્તરલયતિ બાષ્પસ્તનતટીં
પ્રિયો મન્યુર્જાતસ્તવ નિરનુરોધે ન તુ વયમ્ ॥

રસાઙ્ગત્વે ચ તસ્ય લક્ષણમપૃથગ્યત્નનિર્વર્ત્યત્વમિતિ
યો રસં બન્ધુમધ્યવસિતસ્ય કવેરલઙ્કારસ્તાં
વાસનામત્યૂહ્ય યત્નાન્તરમાસ્થિતસ્ય નિષ્પદ્યતે સ ન
રસાઙ્ગમિતિ । યમકે ચ પ્રબન્ધેન બુદ્ધિપૂર્વકં ક્રિયમાણે
નિયમેનૈવ યત્નાન્તરપરિગ્રહ આપતતિ શબ્દવિશેષાન્વેષણરૂપઃ ।
અલઙ્કારાન્તરેષ્વપિ તત્તુલ્યમિતિ ચેત્ — નૈવમ્ ; અલઙ્કારાન્તરાણિ
હિ નિરૂપ્યમાણદુર્ઘટનાન્યપિ રસસમાહિતચેતસઃ
પ્રતિભાનવતઃ કવેરહમ્પૂર્વિકયા પરાપતન્તિ । યથા કાદમ્બર્યાં
કાદમ્બરીદર્શનાવસરે । યથા ચ માયારામશિરોદર્શનેન
વિહ્વલાયાં સીતદેવ્યાં સેતૌ । યુક્તં ચૈતત્ , યતો રસા
વાચ્યવિશેષૈરેવાક્ષેપ્તવ્યાઃ । તત્પ્રતિપાદકૈશ્ચ શબ્દૈસ્તત્-
પ્રકાશિનો વાચ્યવિશેષા એવ રૂપકાદયોઽલઙ્કારાઃ । તસ્માન્ન
તેષાં બહિરઙ્ગત્વં રસાભિવ્યક્તૌ । યમકદુષ્કરમાર્ગેષુ તુ
તત્સ્થિતમેવ । યત્તુ રસવન્તિ કાનિચિદ્યમકાદીનિ દૃશ્યન્તે , તત્ર
રસાદીનામઙ્ગતા । યમકાદીનાં ત્વઙ્ગિતૈવ । રસાભાસે
ચાઙ્ગત્વમપ્યવિરુદ્ધમ્ । અઙ્ગિતયા તુ વ્યઙ્ગ્યે રસે નાઙ્ગત્વં
પૃથક્પ્રયત્નનિર્વર્ત્યત્વાદ્યમકાદેઃ ।

અસ્યૈવાર્થસ્ય સઙ્ગ્રહશ્લોકાઃ —
રસવન્તિ હિ વસ્તૂનિ સાલઙ્કારાણિ કાનિચિત્ ।
એકેનૈવ પ્રયત્નેન નિર્વર્ત્યન્તે મહાકવેઃ ॥

યમકાદિનિબન્ધે તુ પૃથગ્યત્નોઽસ્ય જાયતે ।
શક્તસ્યાપિ રસેઽઙ્ગત્વં તસ્માદેષાં ન વિદ્યતે ॥

રસાભાસાઙ્ગભાવસ્તુ યમકાદેર્ન વાર્યતે ।
ધ્વન્યાત્મભૂતે શ‍ૃઙ્ગારે ત્વઙ્ગતા નોપપદ્યતે ॥ ૧૬॥

ઇદાનીં ધ્વન્યાત્મભૂતસ્ય શ ૃઙ્ગારસ્ય વ્યઞ્જકોઽલ-
ઙ્કારવર્ગ આખ્યાયતે —

ધ્વન્યાત્મભૂતે શ ૃઙ્ગારે સમીક્ષ્ય વિનિવેશિતઃ ।
રૂપકાદિરલઙ્કારવર્ગ એતિ યથાર્થતામ્ ॥ ૧૭॥

અલઙ્કારો હિ બાહ્યાલઙ્કારસામ્યાદઙ્ગિનશ્ચારુત્વ-
હેતુરુચ્યતે । વાચ્યાલઙ્કારવર્ગશ્ચ રૂપકાદિર્યાવાનુક્તો
વક્ષ્યતે ચ કૈશ્ચિત્ , અલઙ્કારાણામનન્તત્વાત્ ॥ ।

સ સર્વોઽપિ યદિ સમીક્ષ્ય વિનિવેશ્યતે તદલક્ષ્યક્રમવ્યઙ્ગ્યસ્ય
ધ્વનેરઙ્ગિનઃ સર્વસ્યૈવ ચારુત્વહેતુર્નિષ્પદ્યતે ॥ ૧૭॥

એષા ચાસ્ય વિનિવેશને સમીક્ષા —
વિવક્ષા તત્પરત્વેન નાઙ્ગિત્વેન કદાચન ।
કાલે ચ ગ્રહણત્યાગૌ નાતિનિર્વહણૈષિતા ॥ ૧૮॥

નિર્વ્યૂઢાવપિ ચાઙ્ગત્વે યત્નેન પ્રત્યવેક્ષણમ્ ।

રૂપકાદિરલઙ્કારવર્ગસ્યાઙ્ગત્વસાધનમ્ ॥ ૧૯॥

રસબન્ધેષ્વત્યાદૃતમનાઃ કવિર્યમલઙ્કારં તદઙ્ગતયા
વિવક્ષતિ । યથા —

ચલાપાઙ્ગાં દૃષ્ટિં સ્પૃશસિ બહુશો વેપથુમતીં
રહસ્યાખ્યાયીવ સ્વનસિ મૃદુ કર્ણાન્તિકચરઃ ।
કરૌ વ્યાધુન્વત્યાઃ પિબસિ રતિસર્વસ્વમધરં
વયં તત્ત્વાન્વેષાન્મધુકર હતાસ્ત્વં ખલુ કૃતી ॥

અત્ર હિ ભ્રમરસ્વભાવોક્તિરલઙ્કારો રસાનુગુણઃ ।
"નાઙ્ગિત્વેને"તિ ન પ્રાધાન્યેન । કદાચિદ્રસાદિતાત્પર્યેણ
વિવક્ષિતોઽપિ હ્યલઙ્કારઃ કશ્ચિદઙ્ગિત્વેન વિવક્ષિતો
દૃશ્યતે । યથા —
ચક્રાભિઘાતપ્રસભાજ્ઞયૈવ ચકાર યો રાહુવધૂજનસ્ય ।
આલિઙ્ગનોદ્દામવિલાસવન્ધ્યં રતોત્સવં ચુમ્બનમાત્રશેષમ્ ॥

અત્ર હિ પર્યાયોક્તસ્યાઙ્ગિત્વેન વિવક્ષા રસાદિતાત્પર્યે સત્યપીતિ ।
અઙ્ગત્વેન વિવક્ષિતમપિ યમવસરે ગૃહ્ણાતિ નાનવસરે ।
અવસરે ગૃહીતિર્યથા —

ઉદ્દામોત્કલિકાં વિપાણ્ડુરરુચં પ્રારબ્ધજૃમ્ભાં ક્ષણા-
દાયાસં શ્વસનોદ્ગમૈરવિરલૈરાતન્વતીમાત્મનઃ ।
અદ્યોદ્યાનલતામિમાં સમદનાં નારીમિવાન્યાં ધ્રુવં
પશ્યન્ કોપવિપાટલદ્યુતિ મુખં દેવ્યાઃ કરિષ્યામ્યહમ્ ॥

ઇત્યત્ર ઉપમા શ્લેષસ્ય ।
ગૃહીતમપિ ચ યમવસરે ત્યજતિ તદ્રસાનુગુણતયાલઙ્કા-
રાન્તરાપેક્ષયા । યથા —

રક્તસ્ત્વં નવપલ્લવૈરહમપિ શ્લાઘ્યૈઃ પ્રિયાયા ગુણૈ-
સ્ત્વામાયાન્તિ શિલીમુખાઃ સ્મરધનુર્મુક્તાસ્તથા મામપિ ।
કાન્તાપાદતલાહતિસ્તવ મુદે તદ્વન્મમાપ્યાવયોઃ
સર્વં તુલ્યમશોક કેવલમહં ધાત્રા સશોકઃ કૃતઃ ॥

અત્ર હિ પ્રબન્ધપ્રવૃત્તોઽપિ શ્લેષો વ્યતિરેકવિવક્ષયા
ત્યજ્યમાનો રસવિશેષમ્ પુષ્ણાતિ । નાત્રાલઙ્કાર-
દ્વયસન્નિપાતઃ , કિં તર્હિ ? અલઙ્કારાન્તરમેવ
શ્લેષવ્યતિરેકલક્ષણં નરસિંહવદિતિ ચેત્ — ન , તસ્ય
પ્રકારાન્તરેણ વ્યવસ્થાપનાત્ । યત્ર હિ શ્લેષવિષય એવ
શબ્દે પ્રકારાન્તરેણ વ્યતિરેકપ્રતીતિર્જાયતે સ તસ્ય
વિષયઃ । યથા –" સ હરિર્નામ્ના દેવઃ સહરિર્વરતુરગ-
નિવહેન" ઇત્યાદૌ । અત્ર હ્યન્ય એવ શબ્દઃ શ્લેષસ્ય
વિષયોઽન્યશ્ચ વ્યતિરેકસ્ય । યદિ ચૈવંવિધે
વિષયેઽલઙ્કારાન્તરત્વકલ્પના ક્રિયતે તત્સંસૃષ્ટેર્વિષ-
યાપહાર એવ સ્યાત્ । શ્લેષમુખેનૈવાત્ર વ્યતિરેકસ્યાત્મ-
લાભ ઇતિ નાયં સંસૃષ્ટેર્વિષય ઇતિ ચેત્ — ન ; વ્યતિરેકસ્ય
પ્રકારાન્તરેણાપિ દર્શનાત્ । યથા —
નો કલ્પાપાયવાયોરદયરયદલત્ક્ષ્માધરસ્યાપિ શમ્યા
ગાઢોદ્ગીર્ણોજ્જ્વલશ્રીરહનિ ન રહિતા નો તમઃકજ્જલેન ।
પ્રાપ્તોત્પત્તિઃ પતઙ્ગાન્ન પુનરુપગતા મોષમુષ્ણત્વિષો વો
વર્તિઃ સૈવાન્યરૂપા સુખયતુ નિખિલદ્વીપદીપસ્ય દીપ્તિઃ ॥

અત્ર હિ સામ્યપ્રપઞ્ચપ્રતિપાદનં વિનૈવ વ્યતિરેકો દર્શિતઃ ।

નાત્ર શ્લેષમાત્રાચ્ચારુત્વપ્રતીતિરસ્તીતિ શ્લેષસ્ય
વ્યતિરેકાઙ્ગત્વેનૈવ વિવક્ષિતત્વાત્ ન સ્વતોઽલઙ્કારતેત્યપિ
ન વાચ્યમ્ । યત એવંવિધે વિષયે સામ્યમાત્રાદપિ
સુપ્રતિપાદિતાચ્ચારુત્વં દૃશ્યત એવ । યથા —

આક્રન્દાઃ સ્તનિતૈર્વિલોચનજલાન્યશ્રાન્તધારામ્બુભિ-
સ્તદ્વિચ્છેદભુવશ્ચ શોકશિખિનસ્તુલ્યાસ્તડિદ્વિભ્રમૈઃ ।
અન્તર્મે દયિતામુખં તવ શશી વૃત્તિઃ સમૈવાવયો-
સ્તત્કિં મામનિશં સખે જલધર ત્વં દગ્ધમેવોદ્યતઃ ॥

ઇત્યાદૌ ।
રસનિર્વહણૈકતાનહૃદયો યં ચ નાત્યન્તં નિર્વોઢુમિચ્છતિ ।
યથા —
કોપાત્કોમલલોલબાહુલતિકાપાશેન બદ્ધ્વા દૃઢં
નીત્વા વાસનિકેતનં દયિતયા સાયં સખીનાં પુરઃ ।
ભૂયો નૈવમિતિ સ્ખલત્કલગિરા સંસૂચ્ય દુશ્ચેષ્ટિતં
ધન્યો હન્યત એવ નિહ્નુતિપરઃ પ્રેયાન્રુદત્યા હસન્ ॥

અત્ર  હિ રૂપકમાક્ષિપ્તમનિર્વ્યૂઢં ચ પરં રસપુષ્ટયે ।
નિર્વોઢુમિષ્ટમપિ યં યત્નાદઙ્ગત્વેન પ્રત્યવેક્ષતે યથા —

શ્યામાસ્વઙ્ગં ચકિતહરિણીપ્રેક્ષણે દૃષ્ટિપાતં
ગણ્ડચ્છાયાં શશિનિ શિખિનાં બર્હભારેષુ કેશાન્ ।
ઉત્પશ્યામિ પ્રતનુષુ નદીવીચિષુ ભ્રૂવિલાસાન્
હન્તૈકસ્થં ક્વચિદપિ ન તે ભીરુ સાદૃશ્યમસ્તિ ॥

ઇત્યાદૌ ।
સ એવમુપનિબધ્યમાનોઽલઙ્કારો રસાભિવ્યક્તિહેતુઃ
કવેર્ભવતિ । ઉક્તપ્રકારાતિક્રમે તુ નિયમેનૈવ રસભઙ્ગહેતુઃ
સમ્પદ્યતે । લક્ષ્યં ચ તથાવિધં મહાકવિપ્રબન્ધેષ્વપિ
દૃશ્યતે બહુશઃ । તત્તુ સૂક્તિસહસ્રદ્યોતિતાત્મનાં મહાત્મનાં
દોષોદ્ઘોષણમાત્મન એવ દૂષણં ભવતીતિ ન વિભજ્ય દર્શિતમ્ ।
કિં તુ રૂપકાદેરલઙ્કારવર્ગસ્ય યેયં વ્યઞ્જકત્વે રસાદિવિષયે
લક્ષણદિગ્દર્શિતા તામનુસરન્ સ્વયં ચાન્યલ્લક્ષણમુત્પ્રેક્ષમાણો
યદ્યલક્ષ્યક્રમપ્રતિભમનન્તરોક્તમેનં ધ્વનેરાત્માનમુપ-

નિબધ્નાતિ સુકવિઃ સમાહિતચેતાસ્તદા તસ્યાત્મલાભો ભવતિ
મહીયાનિતિ ॥ ૧૮-૧૯॥

ક્રમેણ પ્રતિભાત્યાત્મા યોઽસ્યાનુસ્વાનસન્નિભઃ ।
શબ્દાર્થશક્તિમૂલત્વાત્સોઽપિ દ્વેધા વ્યવસ્થિતઃ ॥ ૨૦॥

અસ્ય વિવક્ષિતાન્યપરવાચ્યસ્ય ધ્વનેઃ સંલક્ષ્યક્રમ-
વ્યઙ્ગ્યત્વાદનુરણનપ્રખ્યો ય આત્મા સોઽપિ શબ્દશક્તિ-
મૂલોઽર્થશક્તિમૂલશ્ચેતિ દ્વિપ્રકારઃ ॥

નનુ શબ્દશક્ત્યા યત્રાર્થાન્તરં પ્રકાશતે સ યદિ
ધ્વનેઃ પ્રકાર ઉચ્યતે તદિદાનીં શ્લેષસ્ય વિષય
એવાપહૃતઃ સ્યાત્ , નાપહૃત ઇત્યાહ —

આક્ષિપ્ત એવાલઙ્કારઃ શબ્દશક્ત્યા પ્રકાશતે ।
યસ્મિન્નનુક્તઃ શબ્દેન શબ્દશક્ત્યુદ્ભવો હિ સઃ ॥ ૨૧॥

યસ્માદલઙ્કારો ન વસ્તુમાત્રં યસ્મિન્ કાવ્યે શબ્દશક્ત્યા પ્રકાશતે
સ શબ્દશક્ત્યુદ્ભવો ધ્વનિરિત્યસ્માકં વિવક્ષિતમ્ । વસ્તુદ્વયે ચ
શબ્દશક્ત્યા પ્રકાશમાને શ્લેષઃ । યથા —

યેન ધ્વસ્તમનોભવેન બલિજિત્કાયઃ પુરાસ્ત્રીકૃતો
યશ્ચોદ્વૃત્તભુજઙ્ગહારવલયો ગઙ્ગાં ચ યોઽધારયત્ ।
યસ્યાહુઃ શશિમચ્છિરો હર ઇતિ સ્તુત્યં ચ નામામરાઃ
પાયાત્સ સ્વયમન્ધકક્ષયકરસ્ત્વાં સર્વદોમાધવઃ ॥

નન્વલઙ્કારાન્તરપ્રતિભાયામપિ શ્લેષવ્યપદેશો ભવતીતિ
દર્શિતં ભટ્ટોદ્ભટેન , તત્પુનરપિ શબ્દશક્તિમૂલો ધ્વનિર્નિરવ-
કાશ ઇત્યાશઙ્ક્યેદમુક્તમ્“આક્ષિપ્ત”ઇતિ। તદયમર્થઃ —
યત્ર શબ્દશક્ત્યા સાક્ષાદલઙ્કારાન્તરં વાચ્યં
સત્પ્રતિભાસતે સ સર્વઃ શ્લેષવિષયઃ । યત્ર તુ શબ્દશક્ત્યા
સામર્થ્યાક્ષિપ્તં વાચ્યવ્યતિરિક્તં વ્યઙ્ગ્યમેવાલઙ્કારાન્તરં
પ્રકાશતે સ ધ્વનેર્વિષયઃ । શબ્દશક્ત્યા સાક્ષાદલઙ્કારાન્તર-
પ્રતિભા યથા —
તસ્યા વિનાપિ હારેણ નિસર્ગાદેવ હારિણૌ ।
જનયામાસતુઃ કસ્ય વિસ્મયં ન પયોધરૌ ॥

અત્ર શૃઙ્ગારવ્યભિચારી  વિસ્મયાખ્યો ભાવઃ સાક્ષાદ્વિરો-
ધાલઙ્કારશ્ચ પ્રતિભાસત ઇતિ વિરોધચ્છાયાનુગ્રાહિણઃ શ્લેષસ્યાયં
વિષયઃ , ન ત્વનુસ્વાનોપમવ્યઙ્ગ્યસ્ય ધ્વનેઃ । અલક્ષ્યક્રમવ્યઙ્ગ્યસ્ય
તુ ધ્વનેર્વાચ્યેન શ્લેષેણ વિરોધેન વા વ્યઞ્જિતસ્ય વિષય એવ ।
યથા મમૈવ —

શ્લાઘ્યાશેષતનું સુદર્શનકરઃ સર્વાઙ્ગલીલાજિત-
ત્રૈલોક્યાં ચરણારવિન્દલલિતેનાક્રાન્તલોકો હરિઃ ।
બિભ્રાણાં મુખમિન્દુરૂપમખિલં ચન્દ્રાત્મચક્ષુર્દધ-
ત્સ્થાને યાં સ્વતનોરપશ્યદધિકાં સા રુક્મિણી વોઽવતાત્ ॥

અત્ર વાચ્યતયૈવ વ્યતિરેકચ્છાયાનુગ્રાહી શ્લેષઃ પ્રતીયતે ।
યથા  ચ —
ભ્રમિમરતિમલસહૃદયતાં પ્રલયં મૂર્ચ્છાં તમઃ શરીરસાદમ્ ।
મરણં ચ જલદભુજગજં પ્રસહ્ય કુરુતે વિષં વિયોગિનીનામ્ ॥

યથા વા —

ખણ્ડિતમાનસકાઞ્ચનપઙ્કજનિર્મથિતપરિમલા યસ્ય ।
અખણ્ડિતદાનપ્રસરા બાહુપરિઘા ઇવ ગજેન્દ્રાઃ ॥

અત્ર રૂપકચ્છાયાનુગ્રાહી શ્લેષો વાચ્યતયૈવાવભાસતે ।
સ ચાક્ષિપ્તોઽલઙ્કારો યત્ર પુનઃ શબ્દાન્તરેણાભિહિત-
સ્વરૂપસ્તત્ર ન શબ્દશક્ત્યુદ્ભવાનુરણનરૂપવ્યઙ્ગ્ય-
ધ્વનિવ્યવહારઃ । તત્ર વક્રોક્ત્યાદિવાચ્યાલઙ્કારવ્યવહાર
એવ । યથા —
દૃષ્ટ્યા કેશવ ગોપરાગહૃતયા કિઞ્ચિન્ન દૃષ્ટં મયા
તેનૈવ સ્ખલિતાસ્મિ નાથ પતિતાં કિં નામ નાલમ્બસે ।
એકસ્ત્વં વિષમેષુ ખિન્નમનસાં સર્વાબલાનાં ગતિ-
ર્ગોપ્યૈવં ગદિતઃ સલેશમવતાદ્ગોષ્ઠે હરિર્વશ્ચિરમ્ ॥

એવઞ્જાતીયકઃ સર્વ એવ ભવતુ કામં વાચ્યશ્લેષસ્ય વિષયઃ ।
યત્ર તુ સામર્થ્યાક્ષિપ્તં સદલઙ્કારાન્તરં શબ્દશક્ત્યા
પ્રકાશતે સ સર્વ એવ ધ્વનેર્વિષયઃ । યથા —
" અત્રાન્તરે કુસુમસમયયુગમુપસંહરન્નજૃમ્ભત ગ્રીષ્મા-
ભિધાનઃ ફુલ્લમલ્લિકાધવલાટ્ટહાસો મહાકાલઃ" ।

યથા ચ —
ઉન્નતઃ પ્રોલ્લસદ્ધારઃ કાલાગરુમલીમસઃ ।
પયોધરભરસ્તન્વ્યાઃ કં ન ચક્રેઽભિલાષિણમ્ ॥

યથા વા —
દત્તાનન્દાઃ પ્રજાનાં સમુચિતસમયાકૃષ્ટસૃષ્ટૈઃ પયોભિઃ
પૂર્વાહ્ણે વિપ્રકીર્ણા દિશિ દિશિ વિરમત્યહ્નિ સંહારભાજઃ ।
દીપ્તાંશોર્દીર્ઘદુઃખપ્રભવભવભયોદન્વદુત્તારનાવો
ગાવો વઃ પાવનાનાં પરમપરિમિતાં પ્રીતિમુત્પાદયન્તુ ॥

એષૂદાહરણેષુ શબ્દશક્ત્યા પ્રકાશમાને સત્યપ્રાકરણિ-
કેઽર્થાન્તરે વાક્યસ્યાસમ્બદ્ધાર્થાભિધાયિત્વં મા પ્રસાઙ્ક્ષીદિત્ય-
પ્રાકરણિકપ્રાકરણિકાર્થયોરુપમાનોપમેયભાવઃ કલ્પયિતવ્યઃ
સામર્થ્યાદિત્યર્થાક્ષિપ્તોઽયં શ્લેષો ન શબ્દોપારૂઢ ઇતિ
વિભિન્ન એવ શ્લેષાદનુસ્વાનોપમવ્યઙ્ગ્યસ્ય ધ્વનેર્વિષયઃ ।
અન્યેઽપિ ચાલઙ્કારાઃ શબ્દશક્તિમૂલાનુસ્વાનરૂપવ્યઙ્ગ્યે ધ્વનૌ
સમ્ભવન્ત્યેવ । તથા હિ વિરોધોઽપિ શબ્દશક્તિમૂલાનુસ્વાનરૂપો
દૃશ્યતે । યથા સ્થાણ્વીશ્વરાખ્યજનપદવર્ણને ભટ્ટબાણસ્ય —
" યત્ર ચ માતઙ્ગગામિન્યઃ શીલવત્યશ્ચ ગૌર્યો વિભવરતાશ્ચ
શ્યામાઃ પદ્મરાગિણ્યશ્ચ ધવલદ્વિજશુચિવદના મદિરામોદિ-
શ્વસનાશ્ચ પ્રમદાઃ" ।

અત્ર હિ વાચ્યો વિરોધસ્તચ્છાયાનુગ્રાહી વા શ્લેષોઽયમિતિ ન શક્યં
વક્તુમ્ । સાક્ષાચ્છબ્દેન વિરોધાલઙ્કારસ્યાપ્રકાશિતત્વાત્ । યત્ર
હિ સાક્ષાચ્છબ્દાવેદિતો વિરોધાલઙ્કારસ્તત્ર હિ શ્લિષ્ટોક્તૌ
વાચ્યાલઙ્કારસ્ય વિરોધસ્ય શ્લેષસ્ય વા વિષયત્વમ્ । યથા તત્રૈવ —

" સમવાય ઇવ વિરોધિનાં પદાર્થાનામ્ । તથા હિ — સન્નિહિતબાલાન્ધ-
કારાપિ ભાસ્વન્મૂર્તિઃ" ઇત્યાદૌ ।

યથા વા મમૈવ —
સર્વૈકશરણમક્ષયમધીશમીશં ધિયાં હરિં કૃષ્ણમ્ ।
ચતુરાત્માનં નિષ્ક્રિયમરિમથનં નમત ચક્રધરમ્ ॥

અત્ર હિ શબ્દશક્તિમૂલાનુસ્વાનરૂપો વિરોધઃ સ્ફુટમેવ પ્રતીયતે ।
એવંવિધો વ્યતિરેકોઽપિ દૃશ્યતે । યથા મમૈવ —

ખં યેઽત્યુજ્જ્વલયન્તિ લૂનતમસો યે વા નખોદ્ભાસિનો
યે પુષ્ણન્તિ સરોરુહશ્રિયમપિ ક્ષિપ્તાબ્જભાસશ્ચ યે
યે મૂર્ધસ્વવભાસિનઃ ક્ષિતિભૃતાં યે ચામરાણાં શિરાં-
સ્યાક્રામન્ત્યુભયેઽપિ તે દિનપતેઃ પાદાઃ શ્રિયે સન્તુ વઃ ॥

એવમન્યેઽપિ શબ્દશક્તિમૂલાનુસ્વાનરૂપવ્યઙ્ગ્યધ્વનિપ્રકારાઃ
સન્તિ તે સહૃદયૈઃ સ્વયમનુસર્તવ્યાઃ । ઇહ તુ ગ્રન્થવિસ્તરભયાન્ન
તત્પ્રપઞ્ચઃ કૃતઃ ।

અર્થશક્ત્યુદ્ભવસ્ત્વન્યો યત્રાર્થઃ સ પ્રકાશતે ।
યસ્તાત્પર્યેણ વસ્ત્વન્યદ્વ્યનક્ત્યુક્તિં વિના સ્વતઃ ॥ ૨૨॥

યત્રાર્થઃ સ્વસામર્થ્યાદર્થાન્તરમભિવ્યનક્તિ શબ્દવ્યાપારં
વિનૈવ સોઽર્થશક્ત્યુદ્ભવો નામાનુસ્વાનોપમવ્યઙ્ગ્યો ધ્વનિઃ ।

યથા —
એવંવાદિનિ દેવર્ષૌ પાર્શ્વે પિતુરધોમુખી ।
લીલાકમલપત્રાણિ ગણયામાસ કેવલમ્ ॥

અત્ર હિ લીલાકમલપત્રગણનમુપસર્જનીકૃતસ્વરૂપં શબ્દવ્યાપારં
વિનૈવાર્થાન્તરં વ્યભિચારિભાવલક્ષણં પ્રકાશયતિ। ન
ચાયમલક્ષ્યક્રમવ્યઙ્ગ્યસ્યૈવ ધ્વનેર્વિષયઃ । યતો યત્ર
સાક્ષચ્છબ્દનિવેદિતેભ્યો વિભાવાનુભાવવ્યભિચારિભ્યો
રસાદીનાં પ્રતીતિઃ , સ તસ્ય કેવલસ્ય માર્ગઃ । યથા
કુમારસમ્ભવે મધુપ્રસઙ્ગે વસન્તપુષ્પાભરણં વહન્ત્યા
દેવ્યા આગમનાદિવર્ણનં મનોભવશરસન્ધાનપર્યન્તં
શમ્ભોશ્ચ પરિવૃત્તધૈર્યસ્ય ચેષ્ટાવિશેષવર્ણનાદિ
સાક્ષચ્છબ્દનિવેદિતમ્ । તસ્માદયમન્યો ધ્વનેઃ પ્રકારઃ ।

યત્ર ચ શબ્દવ્યાપારસહાયોઽર્થોઽર્થાન્તરસ્ય વ્યઞ્જકત્વેનો-
પાદીયતે સ નાસ્ય ધ્વનેર્વિષયઃ । યથા —
સઙ્કેતકાલમનસં વિટં જ્ઞાત્વા વિદગ્ધયા ।
હસન્નેત્રાર્પિતાકૂતં લીલાપદ્મં નિમીલિતમ્ ॥

અત્ર લીલાકમલનિમીલનસ્ય વ્યઞ્જકત્વમુક્ત્યૈવ નિવેદિતમ્ ।

તથા ચ —

શબ્દાર્થશક્ત્યા ક્ષિપ્તોઽપિ વ્યઙ્ગ્યોઽર્થઃ કવિના પુનઃ ।
યત્રાવિષ્ક્રિયતે સ્વોક્ત્યા સાન્યૈવાલઙ્કૃતિર્ધ્વનેઃ ॥ ૨૩॥

શબ્દશક્ત્યાર્થશક્ત્યા શબ્દાર્થશક્ત્યા વાક્ષિપ્તોઽપિ વ્યઙ્ગ્યોઽર્થઃ
કવિના પુનર્યત્ર સ્વોક્ત્યા પ્રકાશીક્રિયતે સોઽસ્માદનુસ્વાનોપમવ્યઙ્ગ્યાદ્-
ધ્વનેરન્ય એવાલઙ્કારઃ । અલક્ષ્યક્રમવ્યઙ્ગ્યસ્ય વા ધ્વનેઃ
સતિ સમ્ભવે સ તાદૃગન્યોઽલઙ્કારઃ ।

તત્ર શબ્દશક્ત્યા યથા —
વત્સે મા ગા વિષાદં શ્વસનમુરુજવં સન્ત્યજોર્ધ્વપ્રવૃત્તં
કમ્પઃ કો વા ગુરુસ્તે ભવતુ બલભિદા જૃમ્ભિતેનાત્ર યાહિ ।
પ્રત્યાખ્યાનં સુરાણામિતિ ભયશમનચ્છદ્મના કારયિત્વા
યસ્મૈ લક્ષ્મીમદાદ્વઃ સ દહતુ દુરિતં મન્થમૂઢાં પયોધિઃ ॥

અર્થશક્ત્યા યથા —
અમ્બા શેતેઽત્ર વૃદ્ધા પરિણતવયસામગ્રણીરત્ર તાતો
નિઃશેષાગારકર્મશ્રમશિથિલતનુઃ કુમ્ભદાસી તથાત્ર ।
અસ્મિન્ પાપાહમેકા કતિપયદિવસપ્રોષિતપ્રાણનાથા
પાન્થાયેત્થં તરુણ્યા કથિતમવસરવ્યાહૃતિવ્યાજપૂર્વમ્ ॥

ઉભયશક્ત્યા યથા —" દૃષ્ટ્યા કેશવગોપરાગહૃતયા "
ઇત્યાદૌ ॥ ૨૩॥

પ્રૌઢોક્તિમાત્રનિષ્પન્નશરીરઃ સમ્ભવી સ્વતઃ ।
અર્થોઽપિ દ્વિવિધો જ્ઞેયો વસ્તુનોઽન્યસ્ય દીપકઃ ॥ ૨૪॥

અર્થશક્ત્યુદ્ભવાનુરણનરૂપવ્યઙ્ગ્યે ધ્વનૌ યો વ્યઞ્જકોઽર્થ
ઉક્તસ્તસ્યાપિ દ્વૌ પ્રકારૌ — કવેઃ કવિનિબદ્ધસ્ય વા વક્તુઃ
પ્રૌઢોક્તિમાત્રનિષ્પન્નશરીર એકઃ , સ્વતસ્સમ્ભવી ચ દ્વિતીયઃ ।

કવિપ્રૌઢોક્તિમાત્રનિષ્પન્નશરીરો યથા —
સજ્જયતિ સુરભિમાસો ન તાવદર્પયતિ યુવતિજનલક્ષ્યમુખાન્ ।
અભિનવસહકારમુખાન્નવપલ્લવપત્રલાનનઙ્ગસ્ય શરાન્ ॥

કવિનિબદ્ધવક્તૃપ્રૌઢોક્તિમાત્રનિષ્પન્નશરીરો યથોદાહૃતમેવ —
"શિખરિણિ" ઇત્યાદિ ।

યથા વા —

સાદરવિતીર્ણયૌવનહસ્તાલમ્બં સમુન્નમદ્ભ્યામ્ ।
અભ્યુત્થાનમિવ મન્મથસ્ય દત્તં તવ સ્તનાભ્યામ્ ॥

સ્વતઃ સમ્ભવી ય ઔચિત્યેન બહિરપિ સમ્ભાવ્યમાનસદ્ભાવો ન કેવલં
ભણિતિવશેનૈવાભિનિષ્પન્નશરીરઃ । યથોદાહૃતમ્
"એવંવાદિનિ" ઇત્યાદિ । યથા વા —

શિખિપિચ્છકર્ણપૂરા જાયા વ્યાધસ્ય ગર્વિણી ભ્રમતિ ।
મુક્તાફલરચિતપ્રસાધનાનાં મધ્યે સપત્નીનામ્ ॥ ૨૪॥

અર્થશક્તેરલઙ્કારો યત્રાપ્યન્યઃ પ્રતીયતે ।
અનુસ્વાનોપમવ્યઙ્ગ્યઃ સ પ્રકારોઽપરો ધ્વનેઃ ॥ ૨૫॥

વાચ્યાલઙ્કારવ્યતિરિક્તો યત્રાન્યોઽલઙ્કારોઽર્થસામર્થ્યાત્-
પ્રતીયમાનોઽવભાસતે સોઽર્થશક્ત્યુદ્ભવો નામાનુસ્વાનરૂપ-
વ્યઙ્ગ્યોઽન્યો ધ્વનિઃ ॥ ૨૫॥

તસ્ય પ્રવિરલવિષયત્વમાશઙ્ક્યેદમુચ્યતે —
રૂપકાદિરલઙ્કારવર્ગો યો વાચ્યતાં શ્રિતઃ ।
સ સર્વો ગમ્યમાનત્વં બિભ્રદ્ ભૂમ્ના પ્રદર્શિતઃ ॥ ૨૬॥

અન્યત્ર વાચ્યત્વેન પ્રસિદ્ધો યો રૂપકાદિરલઙ્કારઃ
સોઽન્યત્ર પ્રતીયમાનતયા બાહુલ્યેન પ્રદર્શિતસ્તત્ર-
ભવદ્ભિર્ભટ્ટોદ્ભટાદિભિઃ । તથા ચ સસન્દેહાદિષૂપમા-
રૂપકાતિશયોક્તીનાં પ્રકાશમાનત્વં પ્રદર્શિતમિત્યલઙ્કારા-
ન્તરસ્યાલઙ્કારાન્તરે વ્યઙ્ગ્યત્વં ન યત્નપ્રતિપાદ્યમ્ ॥ ૨૬॥

ઇયત્પુનરુચ્યત એવ
અલઙ્કારાન્તરસ્યાપિ પ્રતીતૌ યત્ર ભાસતે ।
તત્પરત્વં ન વાચ્યસ્ય નાસૌ માર્ગો ધ્વનેર્મતઃ ॥ ૨૭॥

અલઙ્કારાન્તરેષુ ત્વનુરણનરૂપાલઙ્કારપ્રતીતૌ સત્યામપિ
યત્ર વાચ્યસ્ય વ્યઙ્ગ્યપ્રતિપાદનૌન્મુખ્યેન ચારુત્વં ન
પ્રકાશતે નાસૌ ધ્વનેર્માર્ગઃ । તથા ચ દીપકાદાવલઙ્કારે
ઉપમાયા ગમ્યમાનત્વેઽપિ તત્પરત્વેન ચારુત્વસ્યાવ્યવસ્થાનાન્ન
ધ્વનિવ્યપદેશઃ ।
યથા —

ચન્દ્રમયૂખૈર્નિશા નલિની કમલૈઃ કુસુમગુચ્છૈર્લતા ।
હંસૈશ્શારદશોભા કાવ્યકથા સજ્જનૈઃ ક્રિયતે ગુર્વી ॥

ઇત્યાદિષૂપમાગર્ભત્વેઽપિ સતિ વાચ્યાલઙ્કારમુખેનૈવ ચારુત્વં વ્યવતિષ્ઠતે ન વ્યઙ્ગ્યાલઙ્કારતાત્પર્યેણ । તસ્માત્તત્ર વાચ્યાલઙ્કારમુખેનૈવ કાવ્યવ્યપદેશો ન્યાય્યઃ । યત્ર તુ વ્યઙ્ગ્ય-પરત્વેનૈવ વાચ્યસ્ય વ્યવસ્થાનં તત્ર વ્યઙ્ગ્યમુખેનૈવ વ્યપદેશો યુક્તઃ ।

યથા –

પ્રાપ્તશ્રીરેષ કસ્માત્પુનરપિ મયિ તં મન્થખેદં વિદધ્યા-
ન્નિદ્રામપ્યસ્ય પૂર્વામનલમનસો નૈવ સમ્ભાવયામિ ।
સેતું બધ્નાતિ ભૂયઃ કિમિતિ ચ સકલદ્વીપનાથાનુયાત-
સ્ત્વય્યાયાતે વિતર્કાનિતિ દધત ઇવાભાતિ કમ્પઃ પયોધેઃ ॥

યથા વા મમૈવ —

લાવણ્યકાન્તિપરિપૂરિતદિઙ્મુખેઽસ્મિન્
સ્મેરેઽધુના તવ મુખે તરલાયતાક્ષિ ।
ક્ષોભં યદેતિ ન મનાગપિ તેન મન્યે
સુવ્યક્તમેવ જલરાશિરયં પયોધિઃ ॥

ઇત્યેવંવિધે વિષયેઽનુરણનરૂપરૂપકાશ્રયેણ કાવ્યચારુત્વ-વ્યવસ્થાનાદ્રૂપકધ્વનિરિતિ વ્યપદેશો ન્યાય્યઃ ।

ઉપમાધ્વનિર્યથા —

વીરાણાં રમતે ઘુસૃણારુણે ન તથા પ્રિયાસ્તનોત્સઙ્ગે ।
દૃષ્ટી રિપુગજકુમ્ભસ્થલે યથા બહલસિન્દૂરે ॥

યથા વા મમૈવ વિષમબાણલીલાયામસુરપરાક્રમણે કામદેવસ્ય —

તત્તેષાં શ્રીસહોદરરત્નાહરણે હૃદયમેકરસમ્ ।
બિમ્બાધરે પ્રિયાણાં નિવેશિતં કુસુમબાણેન ॥

આક્ષેપધ્વનિર્યથા —

સ વક્તુમખિલાઞ્શક્તો હયગ્રીવાશ્રિતાન્ ગુણાન્ ।
યોઽમ્બુકુમ્ભૈઃ પરિચ્છેદં જ્ઞાતું શક્તો મહોદધેઃ ॥

અત્રાતિશયોક્ત્યા હયગ્રીવગુણાનામવર્ણનીયતાપ્રતિપાદન-

રૂપસ્યાસાધારણતદ્વિશેષપ્રકાશનપરાસ્યાક્ષેપસ્ય
પ્રકાશનમ્ ।

અર્થાન્તરન્યાસધ્વનિઃ શબ્દશક્તિમૂલાનુરણનરૂપવ્યઙ્ગ્યોઽર્થ-
શક્તિમૂલાનુરણનરૂપવ્યઙ્ગ્યશ્ચ સમ્ભવતિ । તત્રાદ્યસ્યોદાહરણમ્ —

દૈવાયત્તે ફલે કિં ક્રિયતામેતાવત્પુનર્ભણામઃ ।
રક્તાશોકપલ્લવાઃ પલ્લવાનામન્યેષાં ન સદૃશાઃ ॥

પદપ્રકાશશ્ચાયં ધ્વનિરિતિ વાક્યસ્યાર્થાન્તરતાત્પર્યેઽપિ
સતિ ન વિરોધઃ । દ્વિતીયસ્યોદાહરણં યથા —

હૃદયસ્થાપિતમન્યુમપરોષમુખીમપિ માં પ્રસાદયન્ ।
અપરાદ્ધસ્યાપિ ન ખલુ તે બહુજ્ઞ રોષિતુમ્ શક્યમ્ ॥

અત્ર હિ વાચ્યવિશેષેણ સાપરાધસ્યાપિ બહુજ્ઞસ્ય કોપઃ
કર્તુમશક્ય ઇતિ સમર્થકં સામાન્યમન્વિતમન્યત્તાત્પર્યેણ
પ્રકાશતે ।

વ્યતિરેકધ્વનિરપ્યુભયરૂપઃ સમ્ભવતિ। તત્રાદ્યસ્યોદાહરણં
પ્રાક્પ્રદર્શિતમેવ।
દ્વિતીયસ્યોદાહરણં યથા —
જાયેય વનોદ્દેશે કુબ્જ એવ પાદપો ગલિતપત્રઃ ।
મા માનુષે લોકે ત્યાગૈકરસો દરિદ્રશ્ચ ॥

અત્ર હિ  ત્યાગૈકરસસ્ય દરિદ્રસ્ય જન્માનભિનન્દનં ત્રુટિતપત્ર-
કુબ્જપાદપજન્માભિનન્દનં ચ સાક્ષાચ્છબ્દવાચ્યમ્ ।
તથાવિધાદપિ પાદપાત્તાદૃશસ્ય પુંસ ઉપમાનોપમેયત્વ-
પ્રતીપૂર્વકં શોચ્યતાયામાધિક્યં તાત્પર્યેણ પ્રકાશયતિ ।
ઉત્પ્રેક્ષાધ્વનિર્યથા —
ચન્દનાસક્તભુજગનિઃશ્વાસાનિલમૂર્ચ્છિતઃ ।
મૂર્ચ્છયત્યેષ પથિકાન્મધૌ મલયમારુતઃ ॥

અત્ર હિ મધૌ મલયમારુતસ્ય પથિકમૂર્ચ્છાકારિત્વં
મન્મથોન્માથદાયિત્વેનૈવ । તત્તુ ચન્દનાસક્તભુજગ-
નિઃશ્વાસાનિલમૂર્ચ્છિતત્વેનોત્પ્રેક્ષિતમિત્યુત્પ્રેક્ષા
સાક્ષાદનુક્તાપિ વાક્યાર્થસામર્થ્યાદનુરણનરૂપા

લક્ષ્યતે । ન ચૈવંવિધે વિષયે ઇવાદિશબ્દપ્રયોગમન્તરેણા-
સમ્બદ્ધતૈવેતિ શક્યતે વક્તુમ્ । ગમકત્વાદન્યત્રાપિ તદપ્રયોગે
તદર્થાવગતિદર્શનાત્ । યથા —

ઈર્ષ્યાકલુષસ્યાપિ તવ મુખસ્ય નન્વેષ પૂર્ણિમાચન્દ્રઃ ।
અદ્ય સદૃશત્વં પ્રાપ્યાઙ્ગ એવ ન માતિ ॥

યથા વા —
ત્રાસાકુલઃ પરિપતન્ પરિતો નિકેતાન્
પુંભિર્ન કૈશ્ચિદપિ ધન્વિભિરન્વબન્ધિ ।
તસ્થૌ તથાપિ ન મૃગઃ ક્વચિદઙ્ગનાભિ
રાકર્ણપૂર્ણનયનેષુહતેક્ષણશ્રીઃ ॥

શબ્દાર્થવ્યવહારે ચ પ્રસિદ્ધિરેવ પ્રમાણમ્ ।

શ્લેષધ્વનિર્યથા —
રમ્યા ઇતિ પ્રાપ્તવતીઃ પતાકાઃ રાગં વિવિક્તા ઇતિ વર્ધયન્તીઃ ।
યસ્યામસેવન્ત નમદ્વલીકાઃ સમં વધૂભિર્વલભીર્યુવાનઃ ॥

અત્ર વધૂભિઃ સહ વલભીરસેવન્તેતિ વાક્યાર્થપ્રતીતેરનન્તરં વધ્વ
ઇવ વલભ્ય ઇતિ શ્લેષપ્રતીતિરશબ્દાપ્યર્થસામર્થ્યાન્મુખ્યત્વેન
વર્તતે ।
યથાસઙ્ખ્યધ્વનિર્યથા —
અઙ્કુરિતઃ પલ્લવિતઃ કોરકિતઃ પુષ્પિતશ્ચ સહકારઃ ।
અઙ્કુરિતઃ પલ્લવિતઃ કોરકિતઃ પુષ્પિતશ્ચ હૃદિ મદનઃ ॥

અત્ર હિ યથોદ્દેશમનૂદ્દેશે યચ્ચારુત્વમનુરણનરૂપં
મદનવિશેષણભૂતાઙ્કુરિતાદિશબ્દગતં તન્મદનસહ-
કારયોસ્તુલ્યયોગિતાસમુચ્ચયલક્ષણાદ્વાચ્યાદતિરિચ્યમાન-
માલક્ષ્યતે । એવમન્યેઽપ્યલઙ્કારા યથાયોગં યોજનીયાઃ ।

એવમલઙ્કારધ્વનિમાર્ગં વ્યુત્પાદ્ય તસ્ય પ્રયોજનવત્તાં
ખ્યાપયિતુમિદમુચ્યતે —

શરીરીકરણં યેષાં વાચ્યત્વે ન વ્યવસ્થિતમ્ ।
તેઽલઙ્કારાઃ પરાં છાયાં યાન્તિ ધ્વન્યઙ્ગતાં ગતાઃ ॥ ૨૮॥

ધ્વન્યઙ્ગતા ચોભાભ્યાં પ્રકારાભ્યાં વ્યઞ્જકત્વેન

વ્યઙ્ગ્યત્વેન ચ । તત્રેહ પ્રકરણાદ્વ્યઙ્ગ્યત્વેનેત્યવગન્તવ્યમ્ ।
વ્યઙ્ગ્યત્વેઽપ્યલઙ્કારાણાં પ્રાધાન્યવિવક્ષાયામેવ
સત્યાં ધ્વનાવન્તઃપાતઃ । ઇતરથા તુ ગુણીભૂતવ્યઙ્ગ્યત્વં
પ્રતિપાદયિષ્યતે ॥ ૨૮॥

અઙ્ગિત્વેન વ્યઙ્ગ્યતાયામપિ , અલઙ્કારાણાં દ્વયી ગતિઃ — કદાચિ-
દ્વસ્તુમાત્રેણ વ્યજ્યન્તે , કદાચિદલઙ્કારેણ ।

તત્ર –
વ્યજ્યન્તે વસ્તુમાત્રેણ યદાલઙ્કૃતયસ્તયા ।
ધ્રુવં ધ્વન્યઙ્ગતા તાસાં
અત્ર હેતુ : —
કાવ્યવૃત્તિસ્તદાશ્રયા ॥ ૨૯॥

યસ્માત્તત્ર તથાવિધવ્યઙ્ગ્યાલઙ્કારપરત્વેનૈવ કાવ્યં પ્રવૃત્તમ્ ।
અન્યથા તુ તદ્વાક્યમાત્રમેવ સ્યાત્ ॥ ૨૯॥

તાસામેવાલઙ્કૃતીનામ્ —
અલઙ્કારાન્તરવ્યઙ્ગ્યભાવે
પુનઃ ,
ધ્વન્યઙ્ગતા ભવેત્ ।
ચારુત્વોત્કર્ષતો વ્યઙ્ગ્યપ્રાધાન્યં યદિ લક્ષ્યતે ॥ ૩૦॥

ઉક્તં હ્યેતત્ —“ ચારુત્વોત્કર્ષનિબન્ધના વાચ્યવ્યઙ્ગ્યયોઃ
પ્રાધાન્યવિવક્ષા“ ઇતિ । વસ્તુ માત્રવ્યઙ્ગ્યત્વે ચાલઙ્કારાણા-
મનન્તરોપદર્શિતેભ્ય એવોદાહરણેભ્યો વિષય ઉન્નેયઃ । તદેવ-
મર્થમાત્રેણાલઙ્કારવિશેષરૂપેણ વાર્થેનાર્થાન્તરસ્યાલઙ્કારસ્ય
વા પ્રકાશને ચારુત્વોત્કર્ષનિબન્ધને સતિ પ્રાધાન્યેઽર્થશક્ત્યુદ્ભવાનુ-
રણનરૂપવ્યઙ્ગ્યો નિરવગન્તવ્યઃ ॥ ૩૦॥

એવં ધ્વનેઃ પ્રભેદાન્ પ્રતિપાદ્ય તદાભાસવિવેકં કર્તુમુચ્યતે —
યત્ર પ્રતીયમાનોઽર્થઃ પ્રમ્લિષ્ટત્વેન ભાસતે ।
વાચ્યસ્યાઙ્ગતયા વાપિ નાસ્યાસૌ ગોચરો ધ્વનેઃ ॥ ૩૧॥

દ્વિવિધોઽપિ પ્રતીયમાનઃ સ્ફુટોઽસ્ફુટશ્ચ । તત્ર ય એવ સ્ફુટઃ
શબ્દશક્ત્યાર્થશક્ત્યા વા પ્રકાશતે સ એવ ધ્વનેર્માર્ગો નેતરઃ ।
સ્ફુટોઽપિ યોઽભિધેયસ્યાઙ્ગત્વેન પ્રતીયમાનોઽવભાસતે સોઽસ્યાનુરણન-

રૂપવ્યઙ્ગ્યસ્ય ધ્વનેરગોચરઃ ।
યથા —
કમલાકરા ન મલિતા હંસા ઉડ્ડાયિતા ન ચ સહસા ।
કેનાપિ ગ્રામતડાગેઽભ્રમુત્તાનિતં ક્ષિપ્તમ્ ॥

અત્ર હિ પ્રતીયમાનસ્ય મુગ્ધવધ્વા જલધરપ્રતિબિમ્બદર્શનસ્ય વાચ્યાઙ્ગત્વમેવ । એવંવિધે વિષયેઽન્યત્રાપિ યત્ર વ્યઙ્ગ્યાપેક્ષયા વાચ્યસ્ય ચારુત્વોત્કર્ષપ્રતીત્યા પ્રાધાન્યમવસીયતે , તત્ર વ્યઙ્ગ્યસ્યાઙ્ગત્વેન પ્રતીતેર્ધ્વનેરવિષયત્વમ્ । યથા —

વેતસલતાગહનોડ્ડીનશકુનિકોલાહલં શ‍ૃણ્વત્યાઃ ।
ગૃહકર્મવ્યાપૃતાયા વધ્વાઃ સીદન્ત્યઙ્ગાનિ ॥

એવંવિધો હિ વિષયઃ પ્રાયેણ ગુણીભૂતવ્યઙ્ગ્યસ્યોદાહરણત્વેન નિર્દેક્ષ્યતે । યત્ર તુ પ્રકરણાદિપ્રતિપત્ત્યા નિર્ધારિતવિશેષો વાચ્યોઽર્થઃ પુનઃ પ્રતીયમાનાઙ્ગત્વેનૈવાવભાસતે સોઽસ્યૈવાનુરણનરૂપવ્યઙ્ગ્યસ્ય ધ્વનેર્માર્ગઃ । યથા —

ઉચ્ચિનુ પતિતં કુસુમં મા ધુનીહિ શેફાલિકાં હાલિકસ્નુષે ।
એષ તે વિષમવિપાકઃ શ્વસુરેણ શ્રુતો વલયશબ્દઃ ॥

અત્ર હ્યવિનયપતિના સહ રમમાણા સખી બહિઃશ્રુતવલયકલકલયા સખ્યા પ્રતિબોધ્યતે । એતદપેક્ષણીયં વાચ્યાર્થપ્રતિપત્તયે । પ્રતિપન્ને ચ વાચ્યેઽર્થે તસ્યાવિનયપ્રચ્છાદનતાત્પર્યેણાભિ-ધીયમાનત્વાત્પુનર્વ્યઙ્ગ્યાઙ્ગત્વમેવેત્યસ્મિન્નનુરણનરૂપવ્યઙ્ગ્ય-ધ્વનાવન્તર્ભાવઃ ॥ ૩૧॥

એવં વિવક્ષિતવાચ્યસ્ય ધ્વનેસ્તદાભાસવિવેકે પ્રસ્તુતે સત્યવિવક્ષિત-વાચ્યસ્યાપિ તં કર્તુમાહ —
અવ્યુત્પત્તેરશક્તેર્વા નિબન્ધો યઃ સ્ખલદ્ગતેઃ ।
શબ્દસ્ય સ ચ ન જ્ઞેયઃ સૂરિભિર્વિષયો ધ્વનેઃ ॥ ૩૨॥

સ્ખલદ્ગતેરુપચરિતસ્ય શબ્દસ્યાવ્યુત્પત્તેરશક્તેર્વા નિબન્ધો યઃ સ ચ ન ધ્વનેર્વિષયઃ ।

યતઃ —
સર્વેષ્વેવ પ્રભેદેષુ સ્ફુટત્વેનાવભાસનમ્ ।

યદ્વ્યઙ્ગ્યસ્યાઙ્ગિભૂતસ્ય તત્પૂર્ણં ધ્વનિલક્ષણમ્ ॥ ૩૩ ॥

તચ્ચોદાહૃતવિષયમેવ ॥ ૩૩ ॥

ઇતિ શ્રીરાજાનકાનન્દવર્ધનાચાર્યવિરચિતે ધ્વન્યાલોકે દ્વિતીયઃ ઉદ્યોતઃ ॥

Encoded by Rajani Arjun Shankar

*Dhvanyalokah Udyotah 2*

pdf was typeset on October 7, 2024

Please send corrections to *sanskrit@cheerful.com*